आसीत् धुन्धुरिति ख्यातः कश्यपस्यौरसः सुतः।
दनुगर्भसमुद्भूतो महाबलपराक्रमः॥
स समाराध्य वरदं ब्रह्माणं तपसासुरः।
अवध्यत्वं सुरैः सर्व्वैः प्रार्थयन् स तु नारद॥
ददौ तस्य च प्रादात् तपसा पङ्कजोद्भवः।
परितुष्टः स च बली निर्ज्जगाम त्रिपिष्टपम्॥
चतुर्थस्य कलेरादौ जित्वा देवान् सवासवान्।
धुन्धुः शक्रत्वमकरोत् हिरण्यकशिपौ सति॥
तस्मिन् काले स बलवान् हिरण्यकशिपुस्ततः।
चचार मन्दरगिरौ दैत्यं धुन्धुं समाश्रितः॥
ततोऽसुरा यथाकामं विहरन्ति त्रिपिष्टपे।
ब्रह्मलोके च त्रिदशाः संस्थिता दुःखसंयुताः॥

ततोऽमरान् ब्रह्मसदोनिवासिनः
श्रुत्वा च धुन्धुर्दितिजानुवाच ह।
गच्छाम दैत्या वयमत्र तस्य
सदो विजेतुं त्रिदशान् सशक्रान्॥
ते धुन्धुवाक्यन्तु निशम्य दैत्याः
प्रोचुर्न नो विद्यति लोकपाल।
गतिर्यया याम पितामहाजिरं
सुदुर्गमोऽयं परतो हि मार्गः॥
इतः सहस्रैर्बहुयोजनाख्यै-
र्लोको महर्नाम महर्षिजुष्टः।
येषां हि नासापवनोद्दितेन
दह्यन्ति दैत्याः सहसेरितेन॥

तेषां वचनमाकर्ण्य धुन्धुः प्रोवाच दानवान्।
गन्तुकामः स सदनं ब्रह्मणो जेतुमीश्वरान्॥
कथन्नु कर्म्मणा केन गम्यते दानवर्षभाः।
कथं तत्र सहस्राक्षः संप्राप्तः सह दैवतैः॥
ते धुन्धुना दानवेन्द्राः पृष्टाः प्रोचुर्वचोऽधिपम्।
कर्म्म तत्र वयं विद्मः शुक्रस्तद्वेत्त्यसंशयम्॥
दैत्यानां वचनं श्रुत्वा धुन्धुर्दैत्यपुरोहितम्।
पप्रच्छ शुक्र किं कर्म्म कृत्वा ब्रह्मसदोगतिः॥
ततोऽस्मै कथयामास दैत्याचार्य्यः कलिप्रियः।
शक्रस्य चरितं श्रीमान् पुरा वृत्ररिपोः किल॥
शक्रः शतन्तु पुण्यानां क्रतूनामजयत् पुरा।
दैत्येन्द्र! वाजिमेधानां तेन ब्रह्मसदो गतः॥
तद्वाक्यं दानवपतिः श्रुत्वा शुक्रस्य वीर्य्यवान्।
यष्टुं तुरगमेधानां चकार मतिमुत्तमाम्॥
आमन्त्र्याहासुरगुरुं दानवांश्चाप्यनुत्तमान्।
प्रोवाच यक्ष्येऽहं यज्ञैरश्वमेधैः सदक्षिणैः॥
आहूयन्ताञ्च निधयश्चाज्ञाप्यन्ताञ्च गुह्यकाः।
प्रयामो देविका यत्र गङ्गा प्राचीनवाहिनी॥
सा हि पुण्या सरिच्छ्रेष्ठा सर्व्वसिद्धिकरी शिवा।
जलं प्राचीनमासाद्य वाजिमेधान् यजामहे॥
इत्थं सुरारिवचनं निशम्यासुरयाजकः।
बाढ़मित्यब्रवीद्धृष्टो निधयः सन्दिदेश सः॥
ततो धुन्धुर्देविकायाः प्राचीने पापनाशने।
भार्गवेन्द्रेण शुक्रेण वाजिमेधाय दीक्षितः॥

ततोऽग्निधूमेन मही सशैला
व्याप्ता दिशः खं विदिशश्च पूर्णाः।
तेनोग्रगन्धेन दिवस्पृशेन
मरुद्दवौ ब्रह्मलोके महर्षे॥

तं गन्धमाघ्राय सुरा विषण्णा
जानन्त धुन्धुं हयमेधदीक्षितम्।
ततः शरण्यं शरणं जनार्द्दनं
जग्मुः सशक्रा जगतः परायणम्॥

प्रणम्य वरदं देवं पद्मनाभं जनार्द्दनम्।
प्रोचुः सर्व्वे सुरगणा भयगद्गदया गिरा॥
भगवन् देवदेवेश! चराचरपरायण!।
विज्ञप्तिः श्रूयतां विष्णो सुराणामार्त्तिनाशन!॥
धुन्धुर्नाम्ना सुरपतिर्बलवान् बलदर्पितः।
शुक्रस्य मतमास्थाय सोऽश्वमेधाय दीक्षितः॥
शतं क्रतूनामिष्ट्वासौ ब्रह्मलोकं महासुरः।
आरोढुमिच्छति बली विजेतुं त्रिदशानपि॥
तस्मादकालहीनन्तु चिन्तयस्व जगद्गुरो।
उपायं मखविध्वंसे भवामो येन निर्वृताः॥
श्रुत्वा सुराणां वचनं भगवान्मधुसूदनः।
दत्त्वाभयं महाबाहुः प्रेषयामास सोऽथ तान्॥
विसृज्य देवताः सर्व्वा ज्ञात्वा जेतुं महासुरम्।
वञ्चनाय मतिञ्चक्रे स धुन्धोरध्वरस्य वै॥
ततः स कृत्वा भगवान् वामनं रूपमीश्वरः।
देहं कृत्वा निरालम्बं काष्ठवद्देविकाजले॥
पयाश्चाञ्चंस्तयोश्चाञ्चमुक्तकेशो यदृच्छया।
दृष्टोऽथ दैत्यपतिना दैत्यैश्चान्यैः सुरर्षिभिः॥
ततः कर्म्म परित्यज्य यज्ञियं ब्राह्मणोत्तमाः।
समुत्तारयितुं विप्रमद्रवन्त समाकुलाः॥
सदस्या यजमानाश्च ऋत्विजश्च महौजसः।
निमज्जमानमुद्दर्त्तुं सर्व्वे तं वामनं द्विजम्॥
समुत्तार्य्य हसन्तस्ते पप्रच्छुः सर्व्व एव हि।
किमर्थं पतितोऽसीह केन क्षिप्तोऽसि वा वद॥
तेषामाकर्ण्य वचनं कम्पमानो मुहुर्मुहुः।
प्राह धुन्धुपुरोगांस्तान् श्रूयतामत्र कारणम्॥
ब्राह्मणो गुणवानासीत् प्रभास इति विश्रुतः।
तस्य पुत्त्रद्वयं जातं मन्दप्रज्ञं सुदुःखितम्॥
तस्य ज्येष्ठो मम भ्राता कनीयानवरस्त्वहम्।
नेत्रभास इति ख्यातो ज्येष्ठो भ्राता ततो-
ऽसुराः॥
मम नाम पिता चक्रे इति भासोऽतिकौतुकात्।
ततः कालेन महता आवयोः स पिता मृतः॥
तस्यौर्द्ध्वदेहिकं कृत्वा गृहमावां समागतौ।
ततो मयोक्तः स भ्राता विभजामो गृहं वयम्।
तेनोक्तो नैव भवतो विद्यते भाग इत्यहम्॥
कुब्जवामनखञ्जानां क्लीवानां श्वित्रिणामपि।
उन्मत्तानां तथान्धानां धनभागो न विद्यते॥
एवमुक्तो मया सोऽथ किमर्थं पैतृकाद्गृहम्।
धनार्हभागमर्हामि नाहं न्यायेन केन वै॥
इत्युक्तवति वाक्येऽसौ भ्राता मे कोपसंयुतः।
समुत्क्षिप्याक्षिपन्नद्यामस्यां मामिति कारणात्॥
ममास्यां निम्नगायान्तु मध्ये च पुरतो गतः।
कालः संवत्सराख्यस्तु शुष्काभिरिह चोद्धृतः॥
के भवन्तश्च संप्राप्ताः सत्त्वं हा बान्धवा इव।
ते वामनवचः श्रुत्वा भार्गवा द्विजसत्तमाः।
प्रोचुर्दैत्यपतिं सर्व्वे वामनार्थकरं वचः॥
इति द्विजानां वचनं श्रुत्वा दैत्यपतिर्व्वचः।
प्राह द्विज ददामीति यावदिच्छसि वै धनम्॥
तद्वाक्यं दानवपतेः श्रुत्वा देवोऽथ वामनः।
प्राहासुरपतिं धुन्धुं स्वार्थसिद्धिकरं वचः॥
सोदरेणापि हि भ्रात्रा ह्रियते यस्य सम्पदः।
तस्याधमस्य यद्दत्तं किमन्यो न हरिष्यति॥
मम प्रमाणमालोक्य मामकञ्च क्रमत्रयम्।
संप्रयच्छस्व दैत्येन्द्र नाधिकं रचितुं क्षमः॥

इत्येवमुक्ते वचने महात्मा
विहस्य दैत्याधिपतिः सऋत्विक्।
प्रादाद्द्विजेन्द्राय पदत्रयं तदा
यदा स नान्यत् जगृहे च किञ्चन॥
क्रमत्रये तोयमदेत्स्य दत्तं
महासुरेन्द्रेण विभुर्यशस्वी।
चक्रे ततो लङ्घयितुं त्रिलोकीं
त्रिविक्रमं रूपमनन्तशक्तिः॥
कृत्वा तु रूपं दितिजांश्च हत्वा
प्रणम्य चर्षीन् प्रथमक्रमेण।
महीं महीध्रैः सहितां सहार्णवां
जहार रत्नाकरपत्तनैर्युताम्॥
भुवं सनाकं त्रिदशाधिवासं
सोमार्कऋक्षैरभिमण्डितं नभः।
देवो द्वितीयेन जगाम वेगात्
क्रमेण देवप्रियलोकमीश्वरः॥
क्रमं तृतीयं न यदास्य पूरितं
तदातिकोपाद्दनुपुङ्गवस्य।
पपात पृष्ठे भगवांस्त्रिविक्रमो
मेरुप्रमाणेन तु विग्रहेण॥

पतता वासुदेवेन दानवोपरि नारद!।
त्रिंशद्योजनसाहस्री भूमिर्भूता घटीकृता॥
ततो दैत्यं समुत्पाट्य तस्यां प्रक्षिप्य वेगतः।
वर्षसिक्ताभिरद्भ्यां तां गर्भभूमिमपूरयत्॥
ततः स्वर्गं सहस्राक्षो वासुदेवप्रसादतः।
सुराश्च सर्व्वे त्रैलोक्यमवापुर्निरुपद्रवाः॥
भगवानपि दैत्येन्द्रं प्रक्षिप्य सिकतार्णवे।
कालिन्द्यां रूपमाधाय तत्रैवान्तरधीयत॥"

इति वामने ७५ अध्यायः॥

वामनः, त्रि, (वामयतीति। वम + णिच् + ल्युः।) अतिक्षुद्रः। तत्पर्य्यायः। न्यङ् २ नीचः ३ खर्व्वः ४ ह्रस्वः ५। इत्यमरः॥ अनुच्चः ६ अनायतः ७। इति जटाधरः॥ (यथा, नैषधे। २२। ५७।

"विधिस्तुषारर्त्तुदिनानि कर्त्तुं
कर्त्तुं विनिर्म्माति तदन्तभिन्नैः।
ज्योत्स्नीनं चेत् तत्प्रतिमा इमा वा
कथं कथं तानि च वामनानि॥")

वामनव्रतं, क्ली, (वामनदेवताकं व्रतम्।) श्रवणद्वादशीकर्त्तव्यो वामनदेवस्य व्रतविशेषः।

अथ श्रीवामनव्रतविधिः।

"नत्वा गुरुमनुज्ञाप्य पश्चान्नियममाचरेत्।
न हि सिद्धिर्गुरोर्भक्तिं नियमञ्च विना फलम्॥"

नियममन्त्रः।

"एकादश्यां निराहारः स्थित्वा चैवापरेऽहनि।